अथ स्वप्ने—

कान्ते सल्पमुपागते प्रियतमा संवेशलब्धेऽथ त-
त्पाणिस्पर्शनजातरोमविकृतिः किञ्चित्सरोषावदत् ।
मा मां संस्पृश नाथ शून्यमिति सा किञ्चिल्लपन्ती वय-
स्या श्रुत्वेति शुशोच कः स सुभगः स्वप्नेऽपि यं नाथति ॥ ९ ॥

प्रदेशे—

सौधं सुन्दरि चन्द्रधामधवलं दीप्तप्रदीपोज्ज्वलं
गेयं कोकिलकाकलीसुमधुरं स्त्रीभिर्मनोमन्मथम् ।
खण्डक्षोदसुधामधूकमधुरः सीधुः स्फुटं निष्फलो
यद्यायाति गृहे न तेऽद्य सुभगः सौभाग्यशोभाचणः ॥ १० ॥

काले—

धुन्वन्सरोरुहवनानि मरुत्प्रयाति
चन्द्रोदयेन कुमुदानि विकस्वराणि ।
तल्पं प्रकल्पितमिदं कुसुमप्रवेकै-
स्तच्चं विनाखिलमिदं न मनो धिनोति ॥ ११ ॥

भङ्ग्या—

अलमलं तव यौवनमङ्गिभि-
स्तव दृशोः कुचयोरपि विभ्रमैः ।
स सुभगो यदि नैव निरीक्ष्यते
न रहसि प्रसभं परिरभ्यते ॥ १२ ॥

अथान्यदीयकन्यास्वरूपम्—

कन्या रन्तु न च द्रष्टु वक्तु शक्नोति वल्लभम् ।
सलपन्त च पश्यन्त रहसि त्रपया स्फुटम् ॥ १३ ॥

आहूता समुपेति नापि दयितेनोक्ता न च व्याहर-
त्येषा चक्तुमपीहते न शयने शेते पुन समुखम् ।
दीर्घं पश्यति नैव वीक्षितुमसावीप्सत्यनङ्गश्रमा-
वेशाद्धर्तरि नैव कातरमिद धत्ते स्म बालावला ॥ १४ ॥

नायिकाहृदयज्ञा या सखी जल्पति नायकम् ।
तत्सखीं नायक किं वा स्नेहाभिव्यक्तिहेतवे ॥ १५ ॥

अतित्रपामुद्रितनेत्रकुड्मला
मुहुर्मुहु कण्टकिताङ्गयष्टिका ।
कुमुद्वतीवोत्तमवशचन्द्र ते
कृती करस्पर्शमतीव काङ्क्षति ॥ १६ ॥

यच्चन्द्रातपचन्द्रचन्दनमृणालादीनि शीतानि मे
काम सज्वरयन्ति घर्मसलिलक्लिन वपुर्जायते ।
यत्समोहयतीव पङ्कजवनप्रोद्भूतग दानिल-
स्तन्मन्दाक्षविजृम्भित खुननु त जानीहि सर्वं ध्रुवम् ॥ १७ ॥

अथ मुग्धाचेष्टितानि—

सा वल्लभमपश्यन्त प्रवृत्ताक्षी विलोकते ।
आलिमालिङ्गति स्वैर दूरादुद्वीक्षतेऽथ तम् ॥ १८ ॥

सख्या सलपति प्रायो हसति कुर्यादकारणम् ।
सुन्दराङ्गमथ व्याजादाविष्कुर्यात्सविभ्रमम् ॥ १९ ॥

मुहुर्गुम्फति सख्यादिगुम्फिता किङ्किणीव्रज ।
भद्रभङ्गादिकां चेष्टा मञ्जुलां दर्शयत्यलौ ॥ २० ॥

प्रियतमेऽभिमुख समुपागते
धनितया स्थितमेव सर्मीनया ।

हर्षोत्कर्षवशान्निमीलितदृशा भ्रश्यद्दृगन्मेखला-
संवृत्याकुलहस्तया स्मरभरक्लिष्टस्मरावासया।
चित्रं कम्पितगात्रयापि विजने तन्व्या चटूक्तीर्यद्-
वास्तां रन्तुमपीक्षितुं प्रियतमः संभावितो दुर्घटः ॥ २९ ॥

दुःखितापि स्वयं कन्या न मुग्धत्वात्प्रियं वदेत्।
तत्सखी तदवस्थां तु यथास्वं समुदीरयेत् ॥ ३० ॥

रम्भादलानि किल मुर्मुरतां भजन्ते
श्वासैरथाश्रुभिरुदीर्यत एव तापः।
तस्या वियोगवशतः प्रिय काश्यमेवं
यन्नाङ्गुलीयमपि कङ्कणतां प्रयाति ॥ ३१ ॥

अथ पणाङ्गना—

स्वकीयानन्यशरणा वित्तहार्या पणाङ्गना।
प्रेमोद्रेकः परस्याः स्यात्तेन सा कामिनां प्रिया ॥ ३२ ॥

वेश्या सामान्यवनिता कृत्रिमस्नेहपण्डिता।
तस्या गुणिनि न प्रीतिर्न चाप्रीतिश्च निर्गुणे ॥ ३३ ॥

केवलं धनलुब्धास्ता हृदि प्रेमविवर्जिताः।
शृङ्गाराभासरूपः स्यात्तत्संभोगस्तु कामिनाम् ॥ ३४ ॥

यो वेषभृद्गूढकामः सुपलब्धधनो जडः।
क्लीबस्तु पुरुषंमन्यो योऽभिमानी पितुर्धनात् ॥ ३५ ॥

इत्यादिपुरुषान् गत्वा अर्थमाकृष्य तद्धनम्।
निर्धनांस्तान् विमुञ्चन्ति तास्ततो वर्जयेद्बुधः ॥ ३६ ॥

तासां प्रगल्भसुरतप्रौढानां तु प्रलोहरम्।
तिरस्कृतपरस्त्रीकं मैथुनं स्यात्प्रियं नृणाम् ॥ ३७ ॥

गाढाश्लेषनिमर्दितस्तनयुगं स्वेदार्द्रगण्डस्थलं
भ्राम्यद्भ्रूयुगलं नखाङ्कमणितैर्घातैर्विचित्रं पुनः।
सन्दष्टौष्ठविसारसीत्कृतिरयं घेल्लत्करोन्मोहनं
पण्यस्त्रीसुरतं रसेरिव गृहं कामी क्वचित्क्वचित् ॥ ३८

नान्याङ्गनासु सुखं किल निर्विशङ्कं
कर्तुं क्षमः कुलवधूषु धवोऽभ्यसूयाम्।
पण्याङ्गनासु जृम्भते हृदयमेव तस्मात्
सर्वस्वमेव तदिमाः कामनस्य कामम् ॥ ३९ ॥

अयुक्त्या सेविता घ्नन्ति युक्त्या संमदयन्ति ताः।
निसर्गेणैव दुर्ज्ञेयां वेश्यास्तेन विषोपमाः ॥ ४० ॥

अथेमा अष्टौ नायिकाः—

आद्यौ स्वाधीनपतिकाप्रोत्का वासकसज्जिका।
अभिसन्धिता विप्रलब्धा खण्डिताप्यभिसारिका ॥ ४१ ॥

प्रोषितप्रेयसी चेति नायिकाः प्राङ्निरूपिताः।
ता एवेह भवन्त्यष्टौ स्वावस्थाभेदतो यथा ॥ ४२ ॥

अथ स्वाधीनपतिका—

पार्श्वे नोज्झति यस्यास्तु रतिप्रेमसर्वस्वः पतिः।
नानाविलाससंसक्ता स्वाधीनपतिकोदिता ॥ ४३ ॥

तत्कण्ठे कुसुमस्रजं कलयति द्राग्वृत्तपीनस्तन-
द्वन्द्वे पत्रलतां तनोति तिलकं भालेऽथ विन्यस्यति।
गण्डौ कुण्डलमण्डितौ जनयति प्रेमोदितस्तद्वपुः-
स्पर्शं चापि दधद्वियोगविधुरः प्रेयान् प्रियां नोज्झति ॥ ४४ ॥

अथोत्का—

सोत्का भवति यस्यास्तु सङ्केतं नागतः प्रियः।
तस्य चानागमे हेतुं चिन्ताव्याकुलिता स्मरेत् ॥ ४५ ॥

नागान्मे दयितः कयापि परया रुद्धोऽथ सख्यापवा
द्यामकः किमु कारणेन महता भाव्यं तदद्य क्षणे।
विन्यस्याक्ष्य सरोरुहं करतले दीर्घं रुदित्वा तथा
निश्वस्यापि चिरं ततः क्षितितले क्षिप्तादृच्च पुष्पस्रजः ॥ ४६ ॥

अथ वासकसज्जा—

हेया वासकसज्जा सा सज्जितात्मा रताश्रया।
वल्लभागममालोक्य द्वारालोकनतत्परा ॥ ४७ ॥

सालंकारमुदीक्ष्य दर्पणतले स्वाङ्गं प्रदीपोज्ज्वलं
दृश्यं तद्व्यवधाय पद्मनयनान्तः संभ्रमं बिभ्रती।
आयाते दयिते भविष्यति रतं सोत्कण्ठमेवं चिरा-
न्नेत्रेन्दीवरमालिकां किल पुरो द्वारस्थापितपत्तत्रयि ॥ ४८ ॥

अथाभिसन्धिता—

पदलग्नोऽपि यः कोपात्पतिः पूर्वं निराकृतः।
तं विना दुःस्थिता साभिसन्धिता कथिता बुधैः ॥ ४९ ॥

कोपात्कोपनया मया चरणयोर्लग्नः पतिर्धिक्कृतो
यन्मानग्रह सखीवचोऽपि विहितं लब्धं तमस्तत्फलम्।
यच्छीतान्यपि चन्द्रचन्दनविसाम्भोजादिवस्तूनि मे
व्रणदाहुलमुकसंनिभानि च वपुः सन्तापयन्ति ध्रुवम् ॥ ५० ॥

अथ विमलब्धा—

दूतीं संप्रेष्य सङ्केतं गत्वा स्वयमनागते।
प्रिये च तं विना दुःस्था विमलब्धा निगद्यते ॥ ५१ ॥

सङ्केताश्रयमेव मत्सृगदितं संप्रेष्य दूतीं स्वयं
स्थित्वा तत्र च तं विना चिरमसौ यन्म्यामिलाषा ततः।
किं तु स्वागमसूचनाय नयनैर्यद्बाष्पकज्जलै-
र्वर्णेभ्रेणिमिषाद्विलेपि सुचिरं मन्दं ददत्यक्षणे ॥ ५२ ॥

अथ खण्डिता—

दयितो जागतो यस्याः कुतोऽपि रतिमन्दिरे।
तदनागमनेनैव संतप्ता खण्डिता मता ॥ ५३ ॥

दीर्घं निश्वसितं तथैव वदनं सोत्कण्ठमुल्लोकितं
यातं मन्दगतेन साध्वसयुतश्चञ्चद्भुवोरिःस्थादितम्।

सख्या संजल्पित प्रिये रतिगृहे नागच्छति व्याकुल-
प्रेयस्या तदनुष्ठितं किमपि यद्वक्तु न कोऽपि क्षम ॥ ५४ ॥

अथाभिसारिका—

निस्त्रपा स्यान्मदेनैव मदनेनाप्रिया प्रिया ।
अभियाति प्रियप्राक्तं सङ्केत साभिसारिका ॥ ५५ ॥

द्रष्टुं यत्नभमीक्षणैर्न तडितस्तम्भेन न स्तम्भोधर
ध्वानोऽप्याकलित श्रुत तदुदित धाम्य विमृश्यानया ।
नासारम्भवा स्मृता विधुरता तत्सगमाकाङ्क्षया
सङ्केतं दयितस्य केवलमलं चक्रेऽभिसारोद्यमा ॥ ५६ ॥

अथ प्रोषितपतिका—

यस्या कृत्यावधि भर्ता विदेश कारणाद्गत ।
तद्गागमसतप्ता प्रोषितप्रेयसीति सा ॥ ५७ ॥

काचित्पाण्डुरगण्डमण्डललुलत्केशावली संयमं
कृत्वाथ श्लथकङ्कणच्युतिभयादुद्यम्य हस्तौ निजौ ।
स्फारद्वारकपाटलम्बिततनुर्दत्तेक्षणा तत्पथि
प्राय प्रेमभरालसा सुकृतिना सद्य समाश्लिष्यते ॥ ५८ ॥

चिन्ताश्रुश्वातमरस्तज्वरखेददीर्घ-
निश्वाससख्युदितवर्णनसंप्रयोगै ।
घनयोरकया गतधवा किल विप्रलब्धा
सा खण्डितापि विबुधै सदृशीत्यमेव ॥ ५९ ॥

स्वाधीनभर्तृका हृष्टा नानालंकृतिमण्डना ।
एवं वासकसज्जा स्यात्पर सागन्तुकप्रिया ॥ ६० ॥

त्रिधाभिसारिका स्वीया परकीया पणाङ्गना ।
स्वाधीनपतिकाद्यास्तु यथोक्ता प्राक् तथा मता ॥ ६१ ॥

स्वीया सलज्जा सभया प्रच्छन्नापि प्रियं व्रजेत् ।
परकीया तु तद्वेद प्रच्छन्ना शङ्किता हृदि ॥ ६२ ॥

निःशङ्किता मदोद्रेका प्रसृताली सखीयुता ।
ज्येष्ठा तथैकधावस्थाभेदादेताः स्युरष्टधा ॥ ६३ ॥

पुनः सर्वास्त्रधा ताः स्युरुत्तमा मध्यमाधमाः ।
शतत्रयी चतुरशीत्यग्रा भवति तन्मितिः ॥ ६४ ॥

अथोत्तमा—

प्रसीदत्यनुनीता या यथादोषं प्रकुप्यति ।
सानुरागा भृशं पत्यौ गुणहार्या मतोत्तमा ॥ ६५ ॥

क्रुद्धा किं मयि सुभ्रु कोऽन्यमनुजे क्रोधः प्रिय प्रायणः
कोऽस्त्यन्यस्त्वमसीति मा वद शुभे दासोऽन्यदीयः कथम् ।
इत्युच्चार्य पदानतः प्रियतमो भूमेरुदस्यानया
सानन्दस्रवदश्रुसार्द्रकुचयोर्मध्ये धृतः कान्तया ॥ ६६ ॥

अथ मध्यमा—

स्वल्पापराधे या क्रोधं धत्ते शीघ्रं च मुञ्चति ।
कुर्वाधित्कारणाद्रागं याति सा मध्यमा स्मृता ॥ ६७ ॥

कोपावेशवशस्फुरत्तरलसद्विम्बोष्ठपार्श्वोल्लसद्-
गण्डाभोगपरिस्खलच्छ्रमजलव्याजृम्भमाणाक्षिभिः ।
सभ्रूभङ्गविभूषणापि सुभगे पादानतेऽनुग्रहं
चक्रे नूपुरमिश्रतत्कचचयान्मन्दं पृथक्कुर्वती ॥ ६८ ॥

अथाधमा—

प्रकुप्यति विना मन्तुं तुष्यत्यनुनयं विना ।
निर्हेतुकप्रवृत्तिर्या चलचित्ताधमा मता ॥ ६९ ॥

यस्मिन्नुज्ज्वलजगदमण्डलमिदं पूर्णेन्दुबिम्बे हस-
त्युच्चैर्मन्मथभूपतेरपि धनुर्भ्रूविभ्रमो भङ्गुरः ।
हारः स्वेदजबिन्दुविद्रुतरुचिर्मन्दीभवत्कङ्कण-
ध्वानो मानिनि कोऽभिमान इह ते पादप्रसक्ते मयि ॥ ७० ॥

ज्ञातिकालत्रयेऽवस्थाभावमन्मथनायकैः ।
भवेयुर्वेदुधाप्यन्या नोदिता गुरुताभयात् ॥ ७१ ॥

कम्परोमोद्गमस्तम्भाः स्वेदाश्रुजलविभ्रमाः ।
वर्ण्याः सम्भोगशृङ्गारे कविभिर्नायिकाश्रिताः ॥ ७२ ॥

धर्मार्थकामनिपुणैर्द्विजराजमित्र-
संबन्धितीक्ष्णकुलजा चलना न सेव्याः ।
व्यङ्गास्तपोव्रतधराश्च विभिन्नसंख्या -
हीनान्वयाश्च चपला महतामगम्याः ॥ ७३ ॥

स्वीयाभिर्वैरवर्जिनीभिरनिश संभोगसौख्यं सदा
कुर्वाणो नखदन्तखण्डनविधौ चातुर्यचर्याचणाः ।
यस्तत्याज पराङ्गनानिधुवनं स्वप्नीतिकीर्तिप्रियः
सोऽयं नन्दतु नीतिमानकबरः शृङ्गारशृङ्गारकः ॥ ७४ ॥

इति सकलकलापारीणरसिकसाम्राज्यधुरीण-
श्रीअकबरसाहिशृङ्गारदर्पणे द्वितीय उल्लासः ।

तृतीय उल्लासः

अथ विप्रलम्भशृङ्गारः—

विप्रलम्भस्तु शृङ्गारश्चतुर्धा वर्ण्यते बुधैः।
पूर्वानुरागो मानात्मा प्रवासः करुणाह्वयः ॥ १ ॥

तत्राद्यः—

यः पूर्वदर्शनोद्भूतो दम्पत्योः सानुरागयोः।
पूर्वानुरागो विज्ञेयः स चाप्राप्तौ भवेद्यथा ॥ २ ॥

अलं रम्भापत्रव्यजनपवनैश्चन्दनचयै-
रलं फुल्लाम्भोजप्रसुतशयनीयैर्मम सखि।
अलं चन्द्रज्योत्स्नाधिसकिसलयैर्दाहनिपुणैः
परं कन्दर्पाग्निं सुभगपरिरम्भः शमयति ॥ ३ ॥

पूर्णेन्दोरिव मण्डलाद्विरचितं यद्वा सुधास्यन्दितैः
स्त्यानीभूतममन्दसुन्दरलसल्लावण्यपुञ्जीकृतम्।
लीलासद्म रतेरिव स्मरणरम्यासैकभूमिः कदा
प्रेक्षेऽहं प्रणयप्रसादसुभगं कान्तामुखाम्भोरुहम् ॥ ४ ॥

चन्द्रचन्दनकर्पूरविसपङ्केरुहादयः।
स्मरज्वरं न दम्पत्योः शमयन्ति निषेविताः ॥ ५ ॥

मिथो दर्शनसंलापप्रेमान्दोलितचित्तयोः।
भवेत्तयो रसप्राप्तौ दशावस्थापरः स्मरः ॥ ६ ॥

साधिमाः—

तत्राभिलाषचिन्ता च स्मृतिस्तद्गुणकीर्तनम्।
स्यादुद्वेगः प्रलापश्चोन्मादो व्याधिस्तथाष्टमः ॥ ७ ॥
जडत्वं मरणं चेति कामावस्था दश स्मृताः।
दम्पत्योः संगमाभावे जायन्ते विषमा इमाः ॥ ८ ॥

अथाभिलाषः—

तत्संगमकृते गाढं संकल्पाकुलचेतसा ।
व्यवसायो य एव स्यादभिलाषः स संस्मृतः ॥ ९ ॥

बोलाद्धी चलमानसा कुन इयं भूयो गृहान्तर्विश-
त्यायातीह बहिः सहालिभिरहो संभाषते सस्मिता ।
धत्ते विभ्रममन्थरां गतिमथालोक्य प्रियस्याननं
तन्मन्ये विषमायुधस्य विशिखैर्लक्ष्यीकृता लक्ष्यते ॥ १० ॥

अथ चिन्ता—

केनोपायेन लभ्य स्याद्दयितोऽथ धराः कथम् ।
तत्प्राप्तयेऽथ किं कार्यमिति चिन्ता निगद्यते ॥ ११ ॥

प्रेयान् दूरगतः सखी न निपुणा भृत्ये रहस्यं क्वचि-
न्नो याच्यं न पुनः स्मरज्वरभरोन्मन्येऽस्ति वैद्यः पटुः ।
रागोऽस्मिन्मम चि तयेति सुदृशा दृष्टे प्रिये सप्तकी
यन्नत्या वसनावृतिर्न विहिता न प्रस्थितं न स्थितम् ॥ १२ ॥

अथ स्मृतिः—

औदास्य परकृत्येषु यस्मिन्नेकाग्रता प्रिये ।
मनोरथैश्च निश्वासैश्चेष्टा तत्स्मरणं भवेत् ॥ १३ ॥

उज्जृम्भाम्बुरुहप्रवालशयने नैषा विधत्ते रतिं
चन्द्रं निन्दति विन्दतीव दहनं कर्पूरखण्डं पुनः ।
दीर्घश्वासमरुद्भिरेव कृशतां याता विषोदत्तनु-
स्तन्मन्ये स विमुग्धया परिचितः कश्चिद्विदग्धो युवा ॥ १४ ॥

अथ गुणकीर्तनम्—

तद्रूपस्मितचातुर्यसंलापै सदृशः परः ।
युवा न दृश्यते कोऽपि स्यादेतद्गुणकीर्तनम् ॥ १५ ॥

तद्रूपं स्मरविभ्रमस्मयहरं तन्मञ्जुलालोकनं
वाचस्ता स्मरकेलिमङ्गलुभगा निस्तन्द्रचन्द्रोपमम् ।

तस्यास्यं दयितेक्षतां न परतां विभ्रच्चदित्थं मनो
मन्ये भक्षितकालकूटमिव मे यस्मान्मुहुर्मूर्च्छति ॥ १६ ॥

अथोद्वेगः—

यत्र वस्तुनि रम्येऽपि द्वेषः प्रीतिर्न च क्वचित् ।
जीवितव्येऽप्यनाश्वासः स चोद्वेगो मतो यथा ॥ १७ ॥

संतापं ननुते शशी सुतनु ते प्रत्यङ्गमङ्गारव-
च्छ्वेपश्चन्दनजो धिनोति न मनः शीतानिलोऽन्याद्दशः ।
विश्वासोऽपि न जीवितस्थितिविधावुद्भ्रान्तचेता यत-
स्तर्किं सुन्दरि पञ्चबाणविशिखास्त्वय्यास्पदं चक्रिरे ॥ १८ ॥

अथ प्रलापः—

प्रियस्य संगमाभावान्मनो न लभते धृतिम् ।
चक्रि प्रियाश्रितालापं प्रलापो यत्र स स्मृतः ॥ १९ ॥

किञ्चित्कुञ्चितलोचनेन सुभगेनालोकिताहं मया-
पीत्थं चारु निरीक्षितः स च किमप्यूचे वचः सस्मितम् ।
नो शक्ता प्रतिवक्तुमाशु सखि किं यातो विधाय क्षुधं
नाथायास्यति चेत्यनूद्य नयने विस्फारिते सत्पथि ॥ २० ॥

अथोन्मादः—

यत्परोदननिश्वासक्षितिलेखभ्रमादिभिः ।
चेष्टा संजायते यत्र स चोन्मादः स्मृतो यथा ॥ २१ ॥

दीर्घं निश्वसिति क्षितिं विलिखति त्रस्यत्कुरङ्गेक्षणा
सोत्कम्पा पुलकाङ्किता किमपि च ध्यानाधिरूढा प्रिये ।
धूत्वाङ्गे किल चञ्चलर्की च सुदती तस्थौ रुदत्येव सा
मन्ये केचिदमेव मन्मथगुरोरादत्त दीक्षाक्षणम् ॥ २२ ॥

अथ व्याधिः—

दीर्घं श्वासाकुलत्वं च यत्र संतापवेदने ।
शरीरशून्यता प्रायो व्याधिः स्यादष्टमो यथा ॥ २३ ॥

श्वासैः शोषितपुष्पहारनिचयैरापाण्डुगण्डस्थलैः
संतापैः किल मुर्मुरीकृतसितश्रीखण्डलेपद्रवैः ।
गात्रं बालमृणालकोमलमिदं तन्वङ्गि यत्तानवं
प्राप्तत्मदनज्वरप्रकटितैर्दोषैरभिह्वायते ॥ २४ ॥

अथ जडत्वम्—

श्वासाधिक्यं स्मृतिभ्रंशो हुंकारः समयं विना ।
स्तब्धत्वं च दृशः कार्श्यं जडतेत्युदिता यथा ॥ २५ ॥

यद्वक्त्रं घनसारसन्निभमिदं श्वासैः कदुष्णैः कृतो
बिम्बोष्ठस्तव धूसरोऽथ नयने निःस्पन्दतारे यतः ।
याता नाशमपि स्मृतिः परमसौ हुंकार एव स्थित-
स्तच्छङ्के सनिवेश एव मदनः प्रत्यङ्गमङ्गस्मृतः ॥ २६ ॥

अथ मरणम्—

यदा पृथग्विधोपायैर्नार्या न प्रियसंगमः ।
ततः स्मरेषुविद्धाया मरणस्य दशा भवेत् ॥ २७ ॥

एता एव दशावस्थाः पुंसोऽपि स्युर्मनोभुवः ।
वैधर्म्यान्मरणं प्राय कविभिर्नाभिवर्ण्यते ॥ २८ ॥

वर्णयन्ति पुनः केचिन्मुहुर्जीवितकाङ्क्षया ।
सत्यवृत्तानुरोधे तदुपाद्य क्वचिदेव न ॥ २९ ॥

एकस्य मरणेनान्यो म्रियते चेत्कथञ्चन ।
प्रेमातिरेकता न स्यान्मृतश्चेदेकेन संगमः ॥ ३० ॥

प्राङ्नारी सानुरागा स्यान्नरः पश्चात्तदिङ्गितैः ।
ततः संभोगशृङ्गारो निसर्गसुभगो भवेत् ॥ ३१ ॥

अथ शृङ्गाराभासता—

ततोऽन्यथापि नो दोषः स्नेहसाम्यं यदि द्वयोः ।
रक्तापरक्तवृत्तौ तु शृङ्गाराभासता मता ॥ ३२ ॥

शृङ्गाराभासता प्रायो युवैर्हास्येषु वर्ण्यते ।
युवितेन मया खेदे साहसयं सफलीकृतम् ॥ ३३ ॥

अथ परस्त्रीसंगमोपायः—

यस्यां च मानुरागः स्यान्नायकस्तत्सखीगणम् ।
आवर्जयति सान्त्वापि दानमानादिभिर्गुणैः ॥ ३४ ॥

तत्सखीनां पुरस्तस्याः स्तुतिं कुर्वन्निवेदयेत् ।
स्वामिप्रायं विनाप्येता नियुञ्ज्यादिङ्गितं प्रति ॥ ३५ ॥

प्रकाश्य दूतीद्वारेण सम्मथमनोरथम् ।
सप्राभृतैः पुनर्लेखैर्वंशयेत्तामतन्द्रितः ॥ ३६ ॥

रहस्ये तां समालोक्य वचनैर्मृदुचाटुभिः ।
सविस्मयकलायोगैर्विस्मापयति नायकः ॥ ३७ ॥

व्याधिव्याजमुदीर्य शून्यसदने वा स्त्रीसखीसदनि
स्यादात्मिन्नमणे महोत्सवविधौ घोरे भयस्थानके ।
अन्यस्यापि निमन्त्रणेऽथ विपिने किञ्चिद्विविक्तस्थले
प्रायो नूतनसंगमः किल मथेरस्यया नियुक्तस्तयोः ॥ ३८ ॥

गरीयान्यदि रागः स्यात्प्रार्थिना मा न लभ्यते ।
धन्योपायस्तदा कान्तां निस्तन्द्रः साधयेन्नरः ॥ ३९ ॥

परस्त्रीसंगमेपायो न बुधैरुपदिश्यते ।
परं काव्याङ्गमेतत्तु रुचिरं तन्निगद्यते ॥ ४० ॥

प्रतिषेधयवः स्त्रीणां दुर्लभत्वं च यामता ।
तत्सर्वं कामबाणानां निशितीकरणं परम् ॥ ४१ ॥

कान्तानामभिमानाद्वा भयाद्वा परयोषिति ।
महतामपि रम्यं स्यात्प्रच्छन्नसुरतं यथा ॥ ४२ ॥

निम्ने पर्णकुटीरके विरचिते गल्वेऽथ गर्भाङ्कुरै-
र्व्याप्ते गाढतरे तडिद्विलसितैर्भीमं घने गर्जति ।
व्यङ्ग्याकुलितापि यामनयना यामीति जल्पन्त्यपि
प्रायस्तत्र रिरंसति प्रियकृते संहृतयासं मनः ॥ ४३ ॥

अथ मानः—

प्रियं प्रतीर्ष्यया यत्र विकारं कुरुतेऽबला ।
स मानस्तु परस्त्रीणां सङ्गदोषाद्भवेद्यथा ॥ ४४ ॥

किञ्चित्कुञ्चितमेव लोचनयुगं वाष्पाम्बुभिर्गद्गदं
गण्डौ पाण्डुममण्डितावपि परां धत्तः श्रियं पाटलाम् ।
बिम्बोष्ठस्फुरणं तवाद्य दयिते वाक्संयमश्चाधुना
नो विद्मः किमनुग्रहोऽस्ति घटितः स्वान्तेऽथवा विग्रहः ॥ ४५ ॥

स च त्रिधा भवेत्प्रायो नारीणां कामिनं प्रति ।
यथादोषमवेद्य. स्यादुत्तमो मध्यमो लघु ॥ ४६ ॥

तत्र गुरुः—

भुक्त्वा सपत्नीमायाते पत्यौ दृष्टे नखाङ्किते ।
स्वयं तत्सदृयोगोऽस्खलिते स गुरुर्भवेत् ॥ ४७ ॥

तिर्यग्वक्रितमेव नेत्रयुगलं भ्रूविभ्रमो भङ्गुर-
श्चण्डः प्रस्फुरिताधरोऽरुणिमतां धत्ते कपोलद्वयम् ।
कोपावेशवशादियं तव दशा मय्यानते पादयो-
र्यत्यागः कृतवांस्तदा भुजलतापाशेन बध्नातु माम् ॥ ४८ ॥

मध्यमः—

प्रिये दृष्टेऽन्यया सार्धमनुरागेण जल्पति ।
यद्वा सख्योदिते दोषे मान स्यान्मध्यमो यथा ॥ ४९ ॥

कस्मात्तामरसश्रियं सुनयने धत्तस्तरां लोचने
वाणी किं कलकण्ठि निष्ठुरतरा सुभ्रु भ्रुवौ भङ्गुरे ।
मन्तुर्नास्ति मयीति तेन गदिते क्रोधं वृथा मा कृथा
मानिन्याः स्खलदश्रुनेत्रयुगलं चक्रेऽथ तूष्णींस्थितम् ॥ ५० ॥

लघु —

सानुरागदृशा नाथे परां पश्यति कामिनीम् ।
तस्मिन्नन्यमनस्केऽपि स लघीयान्मतो यथा ॥ ५१ ॥

चेज्जानासि कृतापराधमपि मां तत्पार्श्विना संस्पृणा-
मीति त्वत्कुचकुम्भमेव तदपि त्वं मन्यसे विप्रियम् ।
लीलातामरसेन तर्जय परं स्वीयं मुखं साध्वसि-
नेत्रैः कज्जलमेचकैः किमु विधौ विम्बाकृतिं नीयते ॥ ५२ ॥

यः कामिनां तु दुःसाध्यो देशकालबलात्स च ।
कोपः स्त्रीणां भवेत्प्राय. सुखसाध्यो निगद्यते ॥ ५३ ॥

सौधं सुधांशुधवलं रमणीयचित्रं
किञ्चित्कनत्कनकराजिविराजमानम् ।
दीप्तप्रदीपमथ कल्पिततल्परम्यं
क्रीडावनं च कलितं पिककाकलीभिः ॥ ५४ ॥

इत्यादयः प्रदेशास्तु मानिनीनां मनोहराः ।
गरीयसोऽभिमानस्योज्जासनाय भवन्त्यमी ॥ ५५ ॥

दिक्कान्ताननदर्पणप्रतिनिधिं संवीक्ष्य राकानिशा-
कान्तं सौधशिरःसुधाधवलितं तल्पं दुकूलावृतम् ।
आघ्राय स्फुटगन्धबन्धुरतरान् सन्मालतीगुच्छकान्
तत्याज द्रुतमेव चाटुचतुरे कान्ते स्मयं मानिनी ॥ ५६ ॥

प्रभ्युद्गते शशधरे मधुमासि रम्ये
जृम्भाभिमन्मथमहोदयवासरेषु ।
वापीतडागजलकेलिषु मद्यपाने
मानः श्लथत्वमुपयाति मनस्विनीनाम् ॥ ५७ ॥

मुग्धे मन्मथधर्मवारणमिदं पूर्णेन्दुबिम्बं लस-
त्पुष्पैः पश्य रसालमञ्जरिमिमां कामेषुमन्वेषय ।
प्रीतौ कः प्रतिशस्तवेति निगदन् पादानतस्तं करे
बिभ्रत्याः सुतनोस्तनुः पुलकिता सिक्तेव हार्दामृतैः ॥ ५८ ॥

प्रत्यग्रदोषसमये वनिताजनस्य
दूतीजनस्य पुरतो लघुरेव कोपः ।
प्रायो गुरुत्वमुपयाति तयैव कामि-
षयेषु किं नु विषमा विषमेषु रीतिः ॥ ५९ ॥

किमपि चरणपातैर्घातुवादैरुपेते
निविडतरभिमाने किञ्चिदुत्तप्तपूर्णे ।
स्तनयुगलविमागे प्रीतयाप्यायतादरा
मुहुरनुनुतवृत्तौ धीरय कोपो व्यधायि ॥ ६० ॥

चाटूक्तैरपि गाढबाहुनपरीरम्भैर्मुहुश्चुम्बनैः
सान्द्रैः प्रेमवचोभिरम्बुजदृशः स्विन्नन्दिमानं गतः ।
अन्यस्त्रीपरिरम्भजातमुरसि स्वप्नाङ्गरागं समा-
लोक्य द्राग्दयितस्य नूतनतरस्तस्याः स रोषोऽभवत् ॥ ६१ ॥

अथ षडुपायाः—

सामदाने तथा भेद उपेक्षा प्रणतिस्ततः ।
षष्ठः प्रसङ्गविभ्रंशो न दण्डः शुचिहानिदृत् ॥ ६२ ॥

प्रसादने तु मानिन्या उपायाः षडिमे मताः ।
पुरतस्ते निदर्श्यन्ते शुभोदाहृतिसंयुताः ॥ ६३ ॥

अथ साम—

पालनीयस्त्वया कान्ते सापराधोऽपि माद्दशः ।
एवं सान्त्ववचो यत्र तत्साम गदितं बुधैः ॥ ६४ ॥

माद्दशः खलु दुर्विनीत इति ते संरक्षणीयो यदा
दोषः कोऽपि च कोपने लघुतरः क्षन्तव्य एवाधुना ।
एवं सान्त्वनसूचकानि गदतः पत्युर्वचांस्येतया
नेत्राम्भः प्रशमय्य सस्मितमथो वक्तुं क्षनोऽनुग्रहः ॥ ६५ ॥

अथ दानम्—

यत्र तत्तुष्टये दयादयितो भूषणादिकम् ।
किञ्चित्कारणमुद्दिश्य तद्दानमुदितं यथा ॥ ६६ ॥

अयं मुक्ताहार कुचकनककुम्भे तव शुभे
घटेतेत्युक्त्वा सोऽक्षिपदथ गले पङ्कजदृशः ।
तदा रोमोद्दर्षाङ्कुरितवपुषा कुधमलं
जहौ प्रेयानस्या द्रुतमथ चुचुम्बाधरतलम् ॥ ६७ ॥

अथ भेदः—

यत्र प्रसादितं तस्याः समावर्ज्य सखीजनम् ।
कान्तः प्राप्नोति तद्द्वारा कान्ता भेदः स चोच्यते ॥ ६८ ॥

अश्रणोर्लोहितिमानमाशु दधती हस्तद्वयं घुन्वती
मात्रागाः क्षितवेति कर्कशगिरा संतर्जयन्ती मुहुः ।
आगच्छत्यपि वल्लभे प्रियतमा कोपभ्रमद्भ्रूलता
सव्याजं रजितयैव कोमलगिरा स्वैरं समाश्वासिता ॥ ६९ ॥

अथोपेक्षा—

परार्थपिशुनैर्वाक्यैस्त्यक्त्वानुग्रहसंविधाम् ।
यत्रानुगृह्यते योषिदुपेक्षा सा स्मृता यथा ॥ ७० ॥

हारस्तारतरः स्फुरत्तरमिदं प्रैवेयकं सुभ्रु ते
रम्यस्ते तिलकः सुकाञ्चनमयी काञ्ची भृशं राजते ।
प्रत्यङ्गं स्पृशता प्रियेण विलसद्रोमोद्गमा तत्क्षणा-
दित्थं मानमुपेक्ष्यैव शनकैः संत्याजिता मानिनी ॥ ७१ ॥

अथ प्रणतिः—

दैन्यमेकं समाश्रित्य पादयोः पतनात्मता ।
प्रणतिर्वल्लभा सा स्याद्योषितो ललिता यथा ॥ ७२ ॥

काचित्कुङ्कुमपङ्कसंकरलसद्वृत्तोरुपीनस्तन-
द्वन्द्वाङ्क्यन्तिपङ्क्तिपृष्ठमपरस्त्रीसंश्रयं वीक्ष्य तत् ।
भर्तुः पादयुगान्तरस्य किमपि न्यूनं च शंसद्वसं
कामं संमदमाप तीव्रविरहाल्लोलेक्षणाशु क्षणात् ॥ ७३ ॥

अथ प्रसङ्गविभ्रंश—

यत्राकस्मात्प्रजायन्ते भयहर्षादिभावनाः ।
स स्यात्प्रसङ्गविभ्रंशः कोपभ्रंशादथोच्यते ॥ ७४ ॥

वल्लभे गदति मे रुगो हृदि
स्वित्पपात कृतघाजनिःस्वनः ।

किं किमित्युदितयत्युपायया
कोपसंभ्रममयानुशायला ॥ ७५ ॥

प्रसादनं यलिप्ताः स्युरित्युपाया यथोत्तरम् ।
आद्यास्तु भूरिशः कार्यास्त्रयश्चान्त्वाः क्वचिद्बुधैः ॥ ७६ ॥

न चोद्वेजयितव्योऽपि कान्तया मायवः प्रियः ।
मानोऽपि जातुचित्कार्यः प्रणामोद्वसितद्वये ॥ ७७ ॥

प्रयुञ्जीतोपपत्तीश्च दयितापि प्रति प्रियम् ।
नोपेक्षेत पुनः क्षुद्रः स्यादिक्षितकार्यं परम् ॥ ७८ ॥

न स्यात्प्रेम विना मानिनाम्यमूर्यां विना स्मरः ।
द्वयोरपि ततो मानभेदः स्यात्प्रीतिवर्धनः ॥ ७९ ॥

सानुरागा यदैवाम्र मतं सुभग पश्यत ।
दयितेव प्रिय स्यामिन्नाथ चन्द्रोदय जीवित ॥ ८० ॥

अन्नीला मन्त्रयेत्राम कट धृष्ट गतत्रप ।
भो दुर्लीस दुराचार दुमनादिस निष्ठुर ॥ ८१ ॥

मालाकण्ठोरुयचनाद्यमनोज्ञनाथ
सद्विप्रियस्य करणं दयितोमलस्य ।
प्रायः प्रयासयतस्य दुर्लभत्वाच्च
द्वेष्यो मधेरियतमः किल कामिनीनाम् । ८२ ॥

रम्यस्ताण्डवडम्बरोऽपि शिखिनां केकाभृतां बर्हिणात्
पर्जन्या अपि गर्जितध्वनिभृतस्ते वज्रमादेय मे।
वृद्धिप्रोऽपि कदम्बकोरकचय. सोऽङ्गारसन्दोहणात्
प्राणेशाविरहादितस्य सकलं दैवादसह्यं फलम्॥ ८५॥

चिन्तादैर्बल्यमालिन्यजागर्याव्यग्रतादय:।
स्त्रीणां स्युर्बहुधाप्यपि स्यान्मृतिश्चावधे. परम्॥ ८६॥

शशिकलेव तनुस्तनुतां गता
घरतनोरयलिसेऽद्य धवे भृशम्।
अहह काम परेऽहनि सायकान्
निगद कुत्र विमोक्ष्यसि निर्दय॥ ८७॥

रूढा तेऽलकचल्लरी सुमलिना वेणी किमेणेक्षणे
नेत्रं सुभ्रु निरञ्जने धवलतां धत्तेऽथ बिम्बाधर:।
पाण्डुच्छायमिदं वपु' स सुभगो दूरे वियोगक्षम·
व्यापत्तापदशा सखीव सुतनोराश्लिष्य या तस्थुषी॥ ८८॥

शङ्के न तत्र रजनी यदि वा न चन्द्रो
नो कौमुदी धवलयत्यथ विश्वविश्वम्।
किं वा न कोकमिथुनानि विदेशवर्ती -
मां प्रेयसीमपि न संस्मरतीह येन॥ ८९॥

शशधर कुरु ज्योत्स्नामच्छां विकासय कैरवं
विधुनु पवन स्मेराम्भोजावलीं प्रसर स्मर।
विधिजय कथां तस्याप्यद्यावधि परिवूरिमः
किमपि च परं चेतः कर्तुं ममालि समीहते॥ ९०॥

स्युरतो नायकस्यापि दशा विरहसंभवाः।
कामबाणप्रहाराधा गा भूयस्ता रिपोरवि॥ ९१॥

यः प्रेमप्रथिमानमाकलयितु स्विद्विप्रयोगद्रव
जिज्ञासुः मणयौ निजप्रणयिनीं मेने वियुज्य स्फुटम्।

शृङ्गारैकरसामृतस्तिमितधीरुद्दामधामाद्भुतः
श्रीसाहिर्जयतादसावकबरो भूपालचूडामणिः ॥ ६२ ॥

इति सकलकलापारीणरसिकसाम्राज्यधुरीण-
श्रीमकबरसाहिशृङ्गारदर्पणे तृतीय उल्लासः ॥

रम्यस्ताण्डवडम्बरोऽपि शिखिनां केकाभृतां बन्दिसात्
पर्जन्या अपि गर्जितध्वनिभृतस्ते वज्रमादेव मे।
उद्भिन्नोऽपि कदम्बकोरकचयः सोऽङ्गारसन्दोहमात्
प्राणेशाविरहादितस्य सकलं दैवादखण्डं कृतम् ॥ ८५ ॥

चिन्तादैर्बल्यमालिन्यजागर्याव्यग्रतादयः ।
स्त्रीणां स्युर्मदुधाऽपि स्यान्मृतिश्चाऽवधेः परम् ॥ ८६ ॥

शशिकलेव तनुस्तनुतां गता
परतनोश्चलितेऽद्य धवे भृशम् ।
अहह काम परेऽहनि सायकान्
निगद कुत्र विमोक्ष्यसि निर्दय ॥ ८७ ॥

कदा नेऽलकवल्लरी सुमलिना धेणी किमेणोत्तणी
नेत्रे सुभ्रु निरञ्जने घनलतां धत्तोऽथ बिम्बाधरः ।
पाण्डुच्छायमिदं वपुः स सुमगो दूरे वियोगक्रम-
व्यापत्तापदशा सखीव सुतनोराश्लिष्य या तस्थुषी ॥ ८८ ॥

शङ्के न तत्र रजनी यदि वा न चन्द्रो
नो कैरवी घनलयत्यथ विश्वविश्वम् ।
किं वा न कोकमिथुनानि विदेशवर्ती-
मां प्रेयसीमपि न संस्मरतीह येन ॥ ८९ ॥

यद्यद्य कुरु ज्योत्स्नामच्छां विकासय कैरवं
विधुनु पवन स्मेराम्भोजावलीं प्रसर स्मर ।
शिथिलय पथा तस्याप्यद्यावधि परिपूरितः
विमपि च परं चेत कर्तुं ममालि समीहते ॥ ९० ॥

स्युरतो नायकस्यापि दशा विरहसंगयाः ।
कामबाणप्रहाराद्या मा भूवंस्ता रिपोरपि ॥ ९१ ॥

यः प्रेमप्रथिमानपाकलयितु स्विद्धिप्रयोगद्वय
जिज्ञासुः प्रणयी निजप्रणयिनीं भेजे वियुज्य स्फुटम् ।

शृङ्गारैकरसामृतस्तिमितधीरुद्दामधामाद्भुतः
श्रीसाहिर्जयतादसावकबरो भूपालचूडामणिः ॥ ९२ ॥

इति सकलकलापारीणरसिकसाम्राज्यधुरीण-
श्रीअकबरसाहिशृङ्गारदर्पणे तृतीय उल्लासः ॥

चतुर्थ उल्लासः

अथ करुणात्मक —

यत्रैकस्यान्यस्ये म्रक्षो मृतप्रायो भवेत्पर ।
तत्प्रम प्रलपेत्कान्ता स ज्ञेय करुणात्मक ॥ १ ॥

कान्तानः स्मरकेलिचम्पकलता च्छिन्ना खलग्रह्मकी-
प्रक्षाण्ण कवलीकृत पिकफलस्य नोऽधकेशीकृत ।
चन्द्रस्यापि च चन्द्रिका विदलिता नैका चराकी रति
र्निस्मारीकृतमेव विष्टपभिद काम घ्नता शंभुना ॥ २ ॥

सन्यङ्गया मधुरस्वर पिककुले कैश्य मयूरव्रजे
श्वन्द्रेणास्यमृताक्षिणी च हरिणे पीनस्तनौ थारणे ।
दोर्लाम्य नवपल्लव सुरभिता मन्दानिलर्मालयं-
रेतैर्मे दयिता विभज्य च हृता धाता न किञ्चिन्मम ॥ ३ ॥

प्राणेश मन्मथकृतामियतीमवस्था
यातोऽसि त मन्मद्दो खलु म दभाग्या ।
यस्या कृते तपनगामि तवैव मूर्च्छा
सा साम्प्रत नयननिर्गतव रिपूर ॥ ४ ॥

न मे तापव्यापप्रशमनविधौ चन्द्रशकलं
न वा चन्द्रज्योत्स्ना हृदयमुपगूढ न तदलम् ।
परार्तिनाशेवाकथमपि च मूर्च्छापरवशा-
धुना जाम्रयता मयि सुतनु सधेहि सुहृदम् ॥ ५ ॥

रतिमावोद्भवामवस्था विस्मृत्य च द्वयो ।
कार्यवाज्ञायते केवाश्चिदेव करुणाश्रम ॥ ६ ॥

दम्पत्योरपि मावेऽस्ते सगमे च भवेदयम् ।
भूय स्टङ्गारवचन सता च करुणो मत ॥ ७ ॥

ततः शृङ्गार एवायं कारुण्येनानुभावितः ।
कविभिर्गुम्फितो वाढं सुन्दरत्वं प्रकाशते ॥ ८ ॥

अथ सख्यः—

प्रतिवेश्मा नटी चेटी धात्र्यात्रेयी च शिल्पिनी ।
बाला तपस्विनीत्याद्याः स्त्रीणां सख्यः स्मृता बुधैः ॥ ९ ॥

वाग्मित्वं स्मृतिदक्षसाहो भक्तिश्चित्तज्ञता वचः ।
मधुरं नर्मनैपुण्यं कलाभ्यासश्च तद्गुणाः ॥ १० ॥

कौतुकं मण्डनं दत्तोपालम्भोऽथ प्रसादनम् ।
सङ्गश्च विरहाश्वासः सखीकर्मति संस्मृतम् ॥ ११ ॥

कस्यालेख्यमिदं व्यलेखि फलके तन्वङ्गि सत्यं वद
व्याभृश्येति मया तदालिवचनं श्रुत्वा दृशालोक्य च ।
सा वक्तुं न शशाक चारुनयना लज्जानताङ्गी परं
रोमाञ्चाञ्चितचर्मणा निगदितं मद्वल्लभस्यार्त तत् ॥ १२ ॥

सभ्रीची किमपि प्रसाधनविधिं कृत्वाखिलाङ्गेष्वपि
व्यग्रत्वं समवेक्ष्य मन्मथसमावेशादृते चातुरीम् ।
नीपालक्तकमण्डनं कृतवती तस्याः पुनः पादयोः
कामिन्यास्तदिमे भ्रुकुञ्चकलिते चक्षुर्निपातं व्यधात् ॥ १३ ॥

चाटूक्तिः प्रवितायते वरयिता गाढं समाश्लिष्यते
मुग्धः चुम्बनचुङ्कृतिः क्रियत इत्यस्यैव सौख्यावहम् ।
मुग्धे त्वं प्रतिबोधितालिनिधनैर्भेतुर्यवापक्रमे
निष्णातालिसनर्मकर्मसु परं कामेन संशिक्षिता ॥ १४ ॥

उच्चण्डस्मरधूमरानलशिखाज्वालावलीढे हृदि
प्रेयस्या विधृता त्वया निगदितः प्रेमातिरेकः स्वयम् ।
तथिश्रं किल शीतलेऽपि हृदि ते संतापशान्त्यै चिरं
विश्रम्यात्र मयस्यया मम पुनर्निस्नेहया न स्थितम् ॥ १५ ॥

सुभग कुरु मे वाक्यं मुञ्च क्रुधं निजवल्लभां
प्रणयकलहव्यग्रां कामं स्मरज्वरजर्जराम् ।
अनुनय न चेदेकाकिन्यप्यसौ हिमदीधिति-
प्रखरकिरणौर्यास्यत्युच्चैर्बलादपि पञ्चताम् ॥ १६ ॥

अमुकपुलकमभ्राहं दधे वृत्तबुध्ने
निभृतसिह युवाभ्यां स्वेयमानन्दयद्भ्याम् ।
रहसि सुरतकेलि कुर्वतोः कामिनाः सा-
गमःपरलतौघं चेत्युदित्वा वयस्या ॥ १७ ॥

वामं यत्तव सुभ्रु लोचनमिदं भूयः स्फुरत्युच्चकै
रोमाञ्चश्रियमातनोति नितरां वक्षोजयुग्मं पुनः ।
उत्कम्पं भजते यदूरुयुगलं रम्भाप्रकाण्डोपमं
मन्येऽस्मिन् प्रियसंगमं निगदति प्रायोऽद्य सख्यस्तराम् ॥ १८ ॥

सख्य इत्यादिकं कर्म कुर्वाणा योषितां सदा ।
संमन्त्रन्ति रहोमन्त्रविज्ञाननिपुणाः प्रियाः ॥ १९ ॥

शृङ्गार एष कविभिः किल नव्यकाव्य-
बन्धेषु सुन्दरतया ननु वर्णनीयः ।
एतेन हीनमपि किं च कवेः कवित्वं
नैरस्यमेव तृणपूलवबन्धजेव ॥ २० ॥

वर्णयामः कथं नाथ भवत्प्रेमानुपङ्गताम् ।
यत्त्वया प्रापिता संख्यां कान्तैकापि शुभात्मना ॥ २१ ॥

अथ हासः—

वचोऽङ्गवेषवैकृत्यादासमूलात्मजायते ।
पात्रत्रयगतो ज्ञेयो रसोऽयं हास्यसंज्ञितः ॥ २२ ॥

स त्रिविध उत्तमो मध्यमोऽधमश्च । तत्र उत्तमः—

ईषद्विकस्वरैर्गण्डैरीषद्विकचलोचनैः ।
ईषन्निभोष्ठदशनैस्त्रिधा स्यादुत्तमेषु सः ॥ २३ ॥

भाले लोचनमुज्ज्वलज्वलनभृत्पाणौ लसत्कङ्कणं
वक्षश्चाङ्गजाजिनं निगरणे हालाहलालंकृति. ।
शेष. शेखर एष वेषरुचिर. संमोहनाहों वर:
सत्यं चण्डि तवेति शंभुरुदित. सोल्लासहासोऽवतात् ॥ २४ ॥

प्रायो विदीर्णवदनो मध्यमानां भवेदयम् ।
अधमानां पतद्वाष्पो दूरादुच्चध्वनि. स तु ॥ २५ ॥

अथ मध्यम:—

कान्तेऽद्यापि न वेत्सि मन्मथरसव्यापारमार्गं मनाग्
दृष्टः पङ्कजलोचने त्वदधरो भृङ्गेण न प्रेयसा ।
सख्येतं हसिते वधू. प्रमदत सोल्लासहासस्फुट-
द्कोचन्मधुगन्धलुब्धमधुपव्याविद्धं ता मति ॥ २६ ॥

अथाधम:—

गुञ्जाहारमपास्य मौक्तिकलता कण्ठे कृता किं तरां
त्यक्त्वा बर्हिणबर्हमम्बुजमहो कर्णावतंसीकृतम् ।
इत्थं साहिशिरोमणे अकथर त्वद्वैरिनारीगणः
कान्तारे शबरैर्विलोक्य नियतद्वाग्देवतो हस्यते ॥ २७ ॥

स्यान्निम्नपाणिघातोऽत्र मुखरागोऽङ्गवर्तनम् ।
प्राणगण्डकृतस्पन्दो नेत्रोल्लास. प्रजायते ॥ २८ ॥

अथ करुण:—

शोकात्मा करुणः प्रेष्टधनभृत्यक्षयाद्भवेत् ।
निर्वेदवाष्पवैवर्ण्यप्रलापात्मात्र नायक' ॥ २९ ॥

प्रेयान्मे सह बान्धवैर्मृतिमगाद्युद्ध्वा रणप्राङ्गणे
वैधव्येन दुनोति मुग्धवनिताचेतासि सैषा वधूः ।
धुस्त्याज्योऽङ्गव शिशु किमु कृतं दैव त्वया त्वद्विष.
कान्ता साहिशिरोमणे अकथरोदित्येति मूर्च्छामगात् ॥ ३० ॥

वर्णनीयोऽत्र भूपातो दीनयाचय च रोदनम् ।
दैवनिन्दा प्रहारश्च देहस्येत्यादिको मुहुः ॥ ३१ ॥

अथ रौद्रः—

अतिक्रोधात्मको रौद्रो भवेच्छत्रुपराभवात् ।
नायकोऽत्र भवेदुग्र. सामर्थी भीष्मविग्रहः ॥ ३२ ॥

उद्युक्तेर्युधि बाहुजैर्जनयिता यैर्मेऽत्ययं प्रापितो
रामामप्यपहाय वीर्यकलिता रामाह्वयाऽहं द्विजः ।
तेषां जरालकरालकालपरशुत्यच्छिन्नाणां द्विषां
सद्य. शोणितपूरितेऽथ सदनं कर्तास्मि तीर्थे भृगुम् ॥ ३३ ॥

रौद्रानुभावः—

शत्रुक्षेपास्यशोणितस्वेदकम्पाधरभ्रुवः ।
भृकुटिः पाणिघातोऽत्र जायते शस्त्रसंसनम् ॥ ३४ ॥

अथ वीरः—

स्यादुत्साहमयो वीरो दयादानरणोद्भवः ।
नायकः सत्त्वसंपन्नास्त्रविधोऽत्र प्रजायते ॥ ३५ ॥

शौर्यौदार्यगभीरत्वधैर्यादिगुणसंयुत. ।
आवर्जितजनो नेता भवेत्प्रौढपराक्रमः ॥ ३६ ॥

अथोत्तमवीरः—

शेषः कूर्मयुतो बिभर्ति वसुधां विश्वंभरः केशवः
शंभुर्ब्रह्मसहाय एव विदितः सत्त्वे निबद्धस्थितिः ।
एकः शूरशिरोमणिर्निजभुजेनैवेन धत्ते भुवं
भीसाहिर्जयतादसावकमरः खड्गोग्रधाराभृता ॥ ३७ ॥

अथ मध्यम —

त्वं त्रिविक्रम जगत्त्रयमाक्रमाम-
संतोषतो नु मुदितोऽसि यताऽधिकार्थम् ।
नाभ्यर्थितो बलिरहं भवतापि सर्व-
रूपेण याञ्चितमनोरथदानशौण्डः ॥ ३८ ॥

अथाधम —

यस्मिन्नभ्रमुकान्तदन्तमुसला मूलक्षमुन्मूलिता
ज्वालाजालजटालमेघ भिदुर विध्वातमाश्लिष्य माम् ।
हहो वृत्रिपो तदेव भवन किं विस्मृत सयुग
चेदद्य पि चिरीर्षसि प्रतिभट सज्जोऽस्मि लङ्केश्वर ॥ ३९ ॥

तदनुभाव —

अन्वीक्षत्य धृतिर्मानरोमाश्चस्मृतिबुद्धय ।
भवन्ति यत्नात्तेषामर्षावेगाश्च निश्चितम् ॥ ४० ॥

अथ भयानक —

शब्दादेर्विकृतादुघोरवस्तुसदर्शनादपि ।
भयानको भवेत्तेता बाल स्त्री कातर पुनः ॥ ४१ ॥

बालो गभीरमुरजध्वनिमालिलिङ्ग
मातुर्गल समुपकर्ण्य विसारिबाहु ।
प्राप्तुत्करव्यतिकरग्लपिताङ्गशोभ
शोभा बभार परमामपि भीतभीत ॥ ४२ ॥

मानिन्या रतरङ्गसगरविधौ पादानतोऽपि प्रिय
प्रेमप्रायश्चासि य प्रणिगदन् क्रोधा धया धिक्कृत ।
सोऽप्यभ्रमोधरगर्जितर्जितधिया शम्पानिपातोत्कया
सश्लिष्ट स्वयमेव बाहुलतया हित्वाभिमान तया ॥ ४३ ॥

अथ नीचभयानक —

दरभरातियत्नेपथुविद्रुत-
श्रमजलाकुननूभिरुपद्रुतै ।
अकथरेश नोरा नवारिभि
र्यदनदत्तवरैर्यनितायितम् ॥ ४४ ॥

तदनुभाव —

कम्पादिकस्तोऽत्र त्रासो वैवर्यमेव च ।
भवति स्वेदरुग्वाग्विप्लवोपा ससभ्रमा ॥ ४५ ॥

अथ बीभत्स.—

जुगुप्सात्मा तु बीभत्स स्याद्दृश्यस्य दर्शनात्।
श्रवणात्कथनाद्वापि पूतिगन्धादिवासितात् ॥ ४६ ॥

दुर्गन्धप्रचुरकलेवर घसाद्द
बीभत्स कुणपसमूहभीषण तत्।
भ्राम्यद्भि. पतगगणैर्विरूपैमुच्चै-
र्दुर्दर्शं पितृवनमाततान शोभाम् ॥ ४७ ॥

तदनुभाव —

घ्राणस्याच्छादनं देहसंवृतिर्मुखकूणनम्।
निष्ठ्यूति स्याद्घृणा चात्र महोद्वेगान्महत्स्वपि ॥ ४८ ॥

अथाद्भुतः—

विस्मयात्माद्भुतोऽपि स्याद्दृश्योऽसंमाव्यवस्तुनः।
मायेन्द्रजालदिव्यस्त्रीविपिनादेश्च दर्शनात् ॥ ४९ ॥

क्वचर त्वया हृताहं माया निजविद्यया वितत्य मयि।
भ्रमयसि मनसि न विकृतिं कर्तुं तदलं मुधा क्लेशे ॥ ५० ॥

तदनुभावः—

अत्र नेत्रविकास स्याद्गद्गद साधुवादता।
स्वेदरोमाञ्चकम्पाश्च हसा निश्चलतारता ॥ ५१ ॥

अथ शान्त —

सम्यग्ज्ञानसमुद्भूत शान्त सर्वत्र तुल्यदृक्।
निस्पृहोऽत्र भवेद्यत्ता रागद्वेषक्षयाद्यथा ॥ ५२ ॥

साद्रप्रेमरसार्द्रयोवनगतिः स्वैरं हृता संमदाद्
दत्तं भूरि धन यथारुचि तया पात्राय वित्तार्थिने।
विस्फूर्जत्करवालकालनिहतो दुर्वैरिवीरव्रजः
क्रीत्य नः किमतः परं किल परब्रह्मैकतानात्मनाम् ॥ ५३ ॥

तदनुभावः—

निर्विकल्पं मनो गाढं यद्यात्मन्यधिनिष्ठति ।
सुखे न हर्षो नामर्षो दुःखे शान्तरसः स तु ॥ ५४ ॥

अथ विरोधिरससमावेशः—

पूर्वमुक्ता रसा येऽष्टौ मिथस्तेषु विरोधिनौ ।
द्वौ द्वौ रसौ तयोः प्राज्ञः संसर्गं वर्जयेदिह ॥ ५५ ॥

मिथः शृङ्गारवीभत्सौ रसौ वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ च विरोधिनौ ॥ ५६ ॥

शृङ्गाराच्च भवेद्धासो वीरादद्भुतसंभवः ।
भयानकस्तु वीभत्साद्रौद्राच्च करुणो रसः ॥ ५७ ॥

बुधैर्यौ जन्यजनकौ रसौ निगदितौ मिथः ।
तयोर्युक्त्यापि संभेदः कृतः प्रायो न दुष्यति ॥ ५८ ॥

अथ भावाः—

पूर्वं रसेषु ये भावाः संक्षिप्योक्ता विभागगाः ।
स्वतन्त्रतोऽपि ते चात्र वर्ण्यन्ते संमताः सताम् ॥ ५९ ॥

एते रत्यादयो भावा रसाभिप्रायसूचकाः ।
स्थायिसात्त्विकसंचारिभेदैः पञ्चाशदेव ते ॥ ६० ॥

चित्ते न संस्थिते भावाः संकीर्णाः संभवन्त्यपि ।
प्रायो रत्यादयो यद्वत्तयाप्येते निरूपिताः ॥ ६१ ॥

स्मृतिर्धृतिर्भयं चिन्तासूयाशङ्काश्रमोग्रताः ।
ग्लानिश्च विस्मयौत्सुक्ये लज्जोन्मादौ रतिस्तथा ॥ ६२ ॥

जाड्यं विषादश्चापल्यमवहित्था मतिस्तथा ।
निद्रेति भावाः शृङ्गारे बोद्धव्या व्यभिचारिणः ॥ ६३ ॥

चापल्यं च श्रमो निद्रा ग्लानिः स्वप्नोऽप्यसूयया ।
युक्ता शङ्कावहित्येति भावा हास्ये मयोदिताः ॥ ६४ ॥

निर्वेदो जडता चिन्ता ग्लानिर्दैन्यं रुजा धृतिः ।
एते भावाः प्रयोक्तव्याः करुणे भावकोविदैः ॥ ६५ ॥

प्रमोदो गर्व उत्साहोऽसूया चापल्यमुग्रता ।
मदो वेग इमे भावा रौद्रे ज्ञेया विचक्षणैः ॥ ६६ ॥

प्रतिबोधस्तथामर्षोऽसूया क्रोधो धृतिर्मतिः ।
वितर्कश्चाथसंमोहो हर्षशोकौ मदस्मयौ ॥ ६७ ॥

आवेगश्च तथोग्रत्वं वीरे भावा इमे स्मृताः ।
वचनीयं च संत्रासो मरणं स्युर्भयानके ॥ ६८ ॥

भयं विषादोऽपस्मारो रोगोन्मादौ मतिर्मदः ।
बीभत्ससंभवा विद्भिर्भावास्त्वेते प्रकीर्तिताः ॥ ६९ ॥

जाड्यं मोहस्तथावेगो मतिर्हर्षश्च विस्मयः ।
इति भावा निगद्यन्ते रसे कविभिरद्भुते ॥ ७० ॥

संचारिण इमे ज्ञेया भावा प्रतिरसं स्थिताः ।
सात्त्विका एत एवं स्युः सर्वेऽतिरसाश्रयाः ॥ ७१ ॥

अथ रीतयः—

स्युः कौशिकी चारभटी सात्वती भारतीत्यपि ।
चत्स्रो रीतयश्चैता रसावस्थितिसूचकाः ॥ ७२ ॥

यस्यां लास्यविलासमञ्जिरचनागीतस्तुतिः प्रस्तुता
स्त्रीणां विभ्रमहावभावकलितं सद्भोगसंमर्दितम् ।
वेशाङ्गस्तुतिचारुनव्यमधुरा स्तोकैः समासैरियं
विद्वद्भिर्गदिता सुगुम्फरुचिरा रीतिर्ध्रुवं कौशिकी ॥ ७३ ॥

एषा शृङ्गारकरुणाद्भुतहास्यानां वृद्धये बुधैः ।
वृत्तिर्वत्सारप्रयोक्तव्या संदर्भललिता यथा ॥ ७४ ॥

सर्वद्रव्याधरच्छदं रुचिमिद मर्म्मा बिभर्ति श्रियं
मुग्धे च्छादय दाडिमीफलधिया दष्टा कदाचिच्छुकैः ।

यद्वा प्रेमसुधाम्बुधेरिव तरी पश्चेषुबाणप्रणा
किं वा ते खमणडन स्तनतटे तच्चाशुकाबृणु ॥ ७५ ॥

अथारभटी—

यस्या शस्त्रविदारितप्रतिभटैः सकीर्यते सयुग
भ्रान्ताढ्य प्लुतलङ्घितादिकरणै मायेन्द्रजालादिकम् ।
दुर्विज्ञेयपदार्थसार्थकलिताथोज्झिरणाद्भुता
वृत्तिः सारभटी बुधैर्निगदिता भूय समासाकुला ॥ ७६ ॥

इय तु विद्रुधै रौद्रे बीभत्सेऽथ भयानके ।
मायाः शोभाकरी वृत्तिर्महाकाव्ये प्रयुज्यते । ७७ ॥

प्रासप्रोतचलद्विरिन्द्रसदृशप्रोद्दामदन्ताबाल
शुण्यदकुम्भतटावगलितव्यालत्तमुक्तागणम् ।
सक्रोधप्रतियोधरोधनिपुणस्फूर्जत्कृपाणैर्भटै
शस्त्रास्त्रैः गदागदि प्रवृत्ते भीम मिथ सयुगम् ॥ ७८ ॥

नाम्भोदस्तनित त्विद रणारणात्तूर्यं न विद्युल्लता
तस्यासिजलदा न मेचकरुचो गम्भीरघापा गजा० ।
इत्थ साहिशिरोमणे अकबर त्वद्वैरिनारीगणे
ऽरण्ये भ्रस्यति नश्यतीति निगदन् धाराधरस्यागमे ॥ ७९ ॥

मास चिखादिषति शोणितपूरमुच्चै
स्तृष्णक् पिपासति पुरस्तदसौ विकर्षन् ।
भ्रश्यत्कबन्धकलिते समराङ्गणे द्राक्
फेरुः सफेत्कृतिमुखः किल यम्भ्रमीति ॥ ८० ॥

अथ सात्वती—

हर्षोत्कर्षपरा महाद्भुतरसप्राया च सत्त्वाधिका
त्यागोद्रेकयती मनोहरतरोदारैश्च धाचा चयै ।
माधुर्यादिगुणरुपेतवचना सदर्मशुद्धि दध
त्येषा वृत्तिरुदाहृता कृतमुपै अन्या सता सात्वती ॥ ८१

एषा नात्यन्तगूढार्था शब्दसंदर्भबन्धुरा ।
वीरे रौद्रेऽद्भुते शान्ते प्रायो वृत्तिः प्रयुज्यते ॥ ८२ ॥

त्वं विष्णोः शयनाश्रयो जनयिता लक्ष्म्यास्तथैवाकरो
रत्नानां सिकताश्च शुक्तिजगणास्तत्रत्येव गम्भीरिमा ।
मर्यादा घनतातिगा जलनिधे किं वर्णयामः परं
त्वत्तीरेऽपि तृषा न शाम्यति यतः पान्थस्य तद्वर्हितम् ॥ ८३ ॥

सद्यस्कीर्ति जगन्ति पाण्डुरयति त्वत्कीर्तिरेषामला
मित्राणामरुणीकरोति वदनान्यारुद्गण्डान्यपि ।
श्लाघ्यादद्भुतमेव यत्कृतवती श्यामानि तानि द्विषां
श्रीमत्साहिशिरोमणे अकबर त्वां वर्णयामः कथम् ॥ ८४ ॥

खड्गव्यग्रकरोग्रवीरनिवहैरुद्धारितारिव्रज-
च्छुद्यत्कन्धरसिन्धुरस्रवदसृक्पूरैः प्रवाहायितम् ।
आसारायितमत्र बाणविसरैः सम्पायितं चासिभिः
प्रावृट्काल इवाबभावकबर त्वत्सैन्यशूराह्वयः ॥ ८५ ॥

यौवनं विगलितं मनोरमं
सार्धमेव विषयेच्छया गतम् ।
प्रक्षयंजलधौ मनोऽधुना
स्नातुमेव किल न समीहते ॥ ८६ ॥

अथ भारती—

मुख्यनायकमाश्रित्य या सद्वृत्तोक्तिबन्धुरा ।
वीररौद्राद्भुतैराढ्या वृत्तिः सा भारती मता ॥ ८७ ॥

उत्पादात्ययविस्रसार्धजरादुःखादिकं यत्परैः
स्यात्साधारणमेतदेव सकलं प्रायः सतामप्यहो ।
प्रोन्मत्तद्विपकर्णतालतरला शुभ्रातपत्रश्रियो
नूनं निश्चलतां भजन्त इह तद्धेतुः परं साहसम् ॥ ८८ ॥

सुप्तस्तितस्येति यशोदया हरे
जैत्रश्रीरचणरक्षयत्नसः ।

यस्यौ प्रवालस्थितमौक्तिकप्रभं
शिशोः स्मितं किञ्चिदुदञ्चिताधरम् ॥ ८९ ॥

निर्मंयोऽप्यकथरेश्वरो भयं
यद्दद्यो समिति वैरिणां हठात् ।
तेष्वप्यद्धवलं यशः स्वयं
चित्रमत्र समुपाददे तराम् ॥ ९० ॥

इत्थं महाकविविनिर्मितनव्यकाव्य-
बन्धान् विलोक्य सदलंकरणैरुपेतान् ।
वृत्तीरिमाः समवगम्य रसप्रयुक्ताः
काव्यं महाकविरसौ विदधीत रम्यम् ॥ ९१ ॥

अथ काव्यदूषणानि—

प्रत्यनीकं च विरसं दुस्संधानरसं पुनः ।
नीरसं पात्रदुष्टं च काव्यं शिष्टैर्न शस्यते ॥ ९२ ॥

प्रत्यनीकरसमाह—

हरेयाः स्मरामि वदनं हरिणेक्षणायाः
स्फूर्जन्नवक्षतजपूतिपरीतगण्डम् ।
रत्युत्सवस्य समये किल काव्यमेतत्
स्यात्प्रत्यनीकरसमाधवबुधैर्निषिद्धम् ॥ ९३ ॥

मातृमृत्युशुचं हित्वा मायामानय यौवनम् ।
मुधा सुन्दरि मा रोदीरित्यादि विरसं भवेत् ॥ ९४ ॥

एक एव रसो यत्र अन्ये गाढं निषिध्यते ।
नैरन्तर्येण तत्केचित्प्राहुर्विरससंज्ञितम् ॥ ९५ ॥

त्वं याहि तामनुचितां ज्वलिता या तव कृते कृतं मूढ ।
मयि चाटुकार वचनैस्तदुःसन्धानरसमाहुः ॥ ९६ ॥

विद्वेषी बल्वभो मानो ग्लानो मान्यो युवा कृशः ।
तस्या विरहतप्तायाः काव्यमित्यादि नीरसम् ॥ ९७ ॥

रतिप्रगल्भा कन्येयं नित्यं कृष्टा कुलाङ्गना ।
निर्व्याजं गणिका मूढा पाम्रदुष्टं स्मृतं बुधैः ॥ ९८ ॥

एवमन्यरसेष्वेते दोषा यज्ञ्यां विचक्षणैः ।
संसर्गतो भवेद्येषां कवित्वमपि नीरसम् ॥ ९९ ॥

अनेन पद्धतिर्नियतनायिकालक्षण-
स्फुरद्वरसोल्लसल्लवणिमप्रबन्धेन तु ।
अनङ्गरससंगरप्रथितमानमुद्रावतीं
प्रसाद्यतु भामिनीमकबरेश्वरोऽहर्निशम् ॥ १०० ॥

यद्यस्ति काव्यरचनासु रुचिर्विदग्धा
नानारसेषु रसिकत्वकुतूहलं वः ।
सत्पद्मसुन्दरकविग्रथितं सुरम्यं
शृङ्गारदर्पणमुपाध्वमतुष्टचित्ताः ॥ १०१ ॥

इति सकलकलापारीणरसिकसाम्राज्यधुरीण-
श्रीमदकबरसाहिशृङ्गारदर्पणे चतुर्थ उल्लासः ॥

APPENDIX

Srngarasanjivani

of

Haridevamisra

APPENDIX

शृङ्गारसंजीविनी

सासूय करपल्लवे गिरिजया प्रत्याहृते कङ्कणा
दुद्रोवस्य फणीश्वरस्य फणया विस्फारया योजित ।
सध्याबन्धनयालिन पशुपतेरानन्दबाष्पाम्बुभि
प्रव्यक्त परिपूरितो वितरतु श्रेयासि लोयाञ्जलि ॥ १ ॥

रत्नावन्धनकैतवेन हरिणा लक्ष्म्या कराम्भोरुहे
स्पृष्टे दन्तुरिता विरूढपुलकैरन्योन्यमासीच्चनु ।
प्रत्यङ्ग जडता परस्परमभूदित्थ मनोज्ञो महा
साम्राज्य समुपागतो वितरतु श्रेयासि भूयासि व ॥ २ ॥

सृष्टि काचन मान्मथी विजयते यस्या प्रसादादभू-
दम्भोजोपरि नाब्जसगतिरधाकाशे सुमेरुस्थिति ।
लावण्यस्फुरदम्बुकम्युशिखरे चन्द्रोदयो वर्तते
तस्मिन्नेव तमालि तेपु रुचिरा तारावलि खेलति ॥ ३ ॥

आयान्त्या मन्दमन्द मदनतरपते कीर्तिमुल्लासयन्त्या
कुन्दस्फीतस्मितौघै करकमलचलत्कङ्कणकाणगीतैः ।
कालिन्दीलोलदिन्दीवरुचिरदलद्रोणिविद्राविदृम्ब्या
हृष्ट स्थैर्य युवत्या न भवति स पुमान् यो न धैर्य जहाति ॥ ४ ॥

साकूत सकुतूहल सचकित सोत्कण्ठित सत्वर
सोत्कम्प सचमत्कृत सहसित सभ्रम सानन्दितम् ।
राधाया दलितेन्द्रनीलरुचकव्यामाभिरामे हरौ
दूरादेव पतन्ति पङ्कजदलद्रोणिद्रुहो दृष्टय ॥ ५ ॥

सभ्रासा इव साजसा इव लसन्माध्वीकमत्ता इव
प्रेमार्द्रा इव गर्विता इव सुधासिन्धौ निमग्ना इव ।

गोधुग्वंशनतभ्रुवामनुदिनं दृष्टेऽपि क्षामोदरे
दूरादेव पतन्ति तुस्तरचमत्कारस्पृशो दृष्टयः ॥ ६ ॥

ईषद्भिन्नकपोलनालमतुलव्यावृत्तचक्रस्तुति
व्याभुग्नस्तनचक्रवालविलुठद्वेणीविलासस्थिति ।
पश्चान्मन्दमुपेयुषि प्रियतमे तस्याः पतन्ति द्रुतं
भ्रूभङ्गार्पितकेतकीनयदलद्रोणिद्रुहो दृष्टयः ॥ ७ ॥

काञ्चीकङ्कणकिङ्किणीकलरवव्याजादुदारं यशो
गायन्त्या मकरध्वजस्य पुरतो यान्त्याः सखीभिः सह ।
दुग्धाम्भोधितरङ्गसंगतिनटन्नीलोत्पलस्पर्धिनी
दृष्टिर्यत्र पपात सुन्दरदृशो धन्यं तदीयं जनुः ॥ ८ ॥

कन्दर्पस्य जगज्जयाय नृपतेः प्रस्थानमातन्वतो
भृङ्गे गायति कोकिले च पठति प्रोद्दामकामस्तवम् ।
दीर्घा चञ्चलमालिका विरचिता विस्फूर्जदिन्दीवर-
श्रेणिश्यामललोचनाञ्चलचमत्कारैरुदारश्रिया ॥ ९ ॥

उन्मीलन्मकरध्वजक्षितिपतिप्रौढप्रसादोदयः
स्वैरं हन्त यथा यथा चरतनोराविर्भवत्यादरात् ।
नूनं तत्र तथा तथा नयनयोरासीद्बहो वक्रता
तन्मन्ये यत वैभवे सति नवे कस्यास्ति न व्युत्क्रमः ॥ १० ॥

जृम्भारम्भविधौ सरोरुहदृशा चक्रीकृता दोर्लता
नूनं कुण्डलितं मनोजनृपतेः कोदण्डमुद्वेल्लति ।
नो जाने नयनारविन्दविगलद्बाष्पाम्बुवक्त्रानिल-
व्याजाद्धारुणमारुतास्त्रनिवहाः कस्मिन्पतिष्यन्त्यमी ॥ ११ ॥

उन्मीलत्कुचमण्डलं दरप्रव्यक्तनाभीह्रदं
विस्रस्ताञ्चलचक्रवालमतुलस्वेदार्द्रगण्डस्थलम् ।
जृम्भारम्भविजृम्भिताधरदलं सोत्कम्पनेत्रोत्पलं
दूरावुच्चतबाहुदीर्घलतिकं कुम्भस्तनी जृम्भते ॥ १२ ॥

पादाङ्गुष्ठनिपीडितक्षितितल विस्रस्तचेलाञ्चल
व्यालोलत्कुचमण्डल दरगलन्नीवीनितम्बस्थलम् ।
उद्यद्दोलतमुन्नमन्मुखविधुव्यक्षिपद्भ्रूरुह
दूरादुन्नतदाडिमीफलमिव हर्तुं समाकाङ्क्षति ॥ १३ ॥

व्यालोलत्कुचभारभङ्गुरनमन्मध्य चलत्कुण्डल
विस्फूर्जन्मुखमण्डल प्रविलसद्व्यालोलनेत्रोत्पलम् ।
काञ्चीकङ्कणकिङ्किणीरणरणत्कारामिरामक्रम
लोकाना मनसीव कापि सुदती रङ्गे चिर नृत्यति ॥ १४ ॥

एकान्ते मिलितापि पङ्कजमुखी मत्समुखीने पथि
स्पृष्टा शङ्कितमानसेन न मया मूढेन मन्दात्मना ।
मेने मामनभिज्ञमेव किमिय सावज्ञमेवाथवा
मन्ये दुर्विधिचेष्टितैरुभयथा कामाय दत्तोऽञ्जलि ॥ १५ ॥

यान्ती बन्धुजनेन साकमथ मामाकस्मिकाभ्यागत
दृष्ट्वा दर्शितपीवरस्तनतटोन्मीलन्नखाङ्कावलि ।
सा केनापि मिषेन पङ्कजमुखी स्थित्वा सखीसन्निधौ
सव्याज यदुवाच सार्चिवदना तत्केन विस्मार्यते ॥ १६ ॥

प्रत्यग्भूधरशेखरोपरिलसत्काश्मीरगौरद्रव
द्रोहोद्रेकमहोर्मिमासलतनौ ग्रीष्मोग्रभानौ स्थिते ।
स्नातु सिन्धुतटे घटे निवसन धृत्वा यदुद्रोवया
सातङ्क मुहुरीक्षित प्रतिपद भूयस्तदाशास्महे ॥ १७ ॥

उन्मीलन्मकरन्दबिन्दुमसकृत्पीत्वा वसन्तोत्सवे
काम गायति षट्पदे घनमदे कन्दर्पकीर्तिव्रजम् ।
नास्ते मञ्जुपतञ्जिका न शरधिर्नो वा धरण्यो
भ्रूवल्लीधनुषैव सुन्दरमुखी जेतुं जगद्वाञ्छति ॥ १८ ॥

अह यद्वे पङ्केरुहमुखि कठोर मृगदृशो
भृश धन्यो नून भवति बत यद्वोजयदिदम् ।
वियोगव्यापारव्यथितमपि मा मानमधुना
परित्यज्य त्रातु कथमपरथा न प्रभवसि ॥ १९ ॥

उदेति त्वदन्ये विजयिनि सुधांशोरपि मुधा
विधानं निर्लज्जा जगति जलजश्रीरदमयत् ।
अहं मन्ये धन्ये त्वदधरसुधामेव विबुधा
ह्यलब्ध्वा दुग्धाब्धेर्मथनममृतार्थं विससृजुः ॥ २० ॥

यस्यास्त्वं तरलीकरोषि मुरलीनादेन चेतो जवा-
दौत्सुक्येन चरीकरीषि मकरीमुद्रां च घण्टोजयोः ।
कालिन्दीवहरीविवर्तिनयफरीतुल्याचिलक्ष्म्या यया
श्रीजाने विजरीहरीपि विजने धन्यं तदीयं जनुः ॥ २१ ॥

सुखं शेषे शय्यामहमिव न पर्याकुलमति-
र्नघा दीर्घं दुःखं व्रजसि रजनीजानिकिरणैः ।
अहं मन्ये धन्ये त्वमसि सुखिनी तेन सखि यत्
भवत्या साकूतं सहृदपि न दृष्टो यदुपतिः ॥ २२ ॥

दत्तं धामपदं तयैव सकलक्षीणां मुकुटमंस्तके
तस्या एव मृगीदृशः श्रयदुरः सौभाग्यमुन्मीलति ।
सैवास्ते परदेवतं च मदनाराध्यं समाध्यन्तरे
या युष्माभिरखण्डितेन सहजप्रेम्णा समालोकिता ॥ २३ ॥

सद्वृत्तः शुचिरुज्वलो गुणगणग्रामोऽभिरामो रुचा
हारोऽयं हरिणाक्षि ते कुचतटीमालिङ्ग्य निद्रायते ।
युक्तं तत्सदृशानुरागरसिके काचस्तु पाणिग्रहं
यत्तेऽमी मलिनोऽप्यनीदृशगुणस्तन्मे मनः कृन्तति ॥ २४ ॥

चित्तस्याप्यनले मनागपि मुखे मालिन्यमालक्ष्यते
नो यस्याम्बुनिमज्जितस्य न मया वैवर्ण्यमालोकितम् ।
लोहैरप्यथ ताडितस्य न तनौ संकोचलेशोऽप्यभू-
दस्याः स्वर्णमयोरुरोजयुगले युक्तैव तस्य स्थितिः ॥ २५ ॥

सेहे वातजलप्रपातदहनप्रोत्तापजातव्यथां
पश्चाद्विश्लथवियोजितोऽथ मृदितो यन्त्रे चिरं भ्रामितः ।
कार्पासो गुणतामवाप्य सहसा जातः स्वयं कञ्चुकी
यत्तोजौ परिरब्धुमेष कृतवान् किं किं न कर्मोद्धतम् ॥ २६ ॥

अजनि रजनिरेषा दण्डमात्रावशेषा
रमणमिलितयोषादीर्घरोषाय नूनम् ।
अभिनवकरशाली लक्ष्यते भानुमाली
तदपि न घनमाली दृश्यते किं निदानम् ॥ २७ ॥

पुरा मुरारेरियमङ्गसङ्गा-
दनङ्गरङ्गाधिकसंगरेषु ।
गता निमेषादिव सैव दोषा
दुर्दैवदोषादिह दैर्घ्यमेति ॥ २८ ॥

स्नेहेन पूर्णमभितो हृदय मदीय
मिन्दीवरोदरसहोदरचारुदृष्टे ।
त्वद्विप्रयोगदहनेन विदह्यमान
यद्भस्मसान्न भवतीति विचित्रमेतत् ॥ २९ ॥

वियोगे तन्वङ्गी तव नवकुरङ्गीदृगभितो
मुहुर्दग्धा देह निखिलगुणगेह यदुपते ।
न लेभे विश्राम कथमपि निकाम तदधुना
विधौ वामे धन्यो परिपदपि वामव भवति ॥ ३० ॥

विधुतुद विधु तुद त्वमसि मित्र तत्र क्षमो
नमोऽस्तु भवते हर प्रहर पञ्चबाण रणे ।
भवान् गिरतु पन्नग त्वरितभाशु मन्दानिल
कुल विरहिणामहो यदधुनैव सशाम्यति ॥ ३१ ॥

धावा क्षावाहजमिव विधु मन्यते धन्यकान्ति
तान्ति लेभे मधुकरवतीरुद्गतै सर्वतोऽपि ।
उद्विग्नाभूदहह कमलैर्निर्मलैरानताङ्गी
सगीतेन व्यथितहृदया निर्दयासीद्वियोगे ॥ ३२ ॥

मूर्ध्ना चन्द्र वहसि सतत हन्त भालेन वह्निं
कण्ठेनोच्चैरहह गरल वक्षसा सर्पराजम् ।
पत्न्मध्ये कथय भगवन् किस्विदत्युष्णमास्ते
सर्पङ्गोऽसि स्मरहर कृतस्त्यक्षमा निह्नवाय ॥ ३३ ॥

द्वारं साम्प्रतमङ्गयङ्गसहितं गोरङ्गवत्माङ्गणं
यन्धुस्थानमधास्ति सिन्धुसहितं चाट्टालिका काशिका ।
इत्थं वाचिकमध्वगाय सुदती व्याहृत्य दृष्ट्वा पतिं
प्राप्त तत्र तदैव दैवयशतो रोमाञ्चिता हृष्यति ॥ ३४ ॥

नित्यं निन्दसि चन्दनानि न विधावानन्दमाविन्दसि
प्रौढामोदयति प्रतिक्षणमथो मन्दासि मन्दानिले ।
उन्मीलत्कलकण्ठकण्ठविलसत्कण्ठिता क्षपयसे
तन्मन्ये मदनो विद्यालिनि तव स्वान्ते तपस्तप्यति ॥ ३५ ॥

स्निग्धा दृष्टिः किमिति कुञ्जने निर्मिता चानभिज्ञे
स्मेर तस्मिन्वदनकमलं किं निमित्त व्यधायि ।
उक्त कस्माद्वचनमुचित चाविदग्धे मयेत्थं
पश्चात्ताप. कुवलयदृशो मानसं कृन्ततीव ॥ ३६ ॥

नीता रात्रि. कथमपि मया दासरोऽप्येष नेयो
नानोपायैर्विरहदलिता नास्मि सद्य स्वतन्त्रा ।
नत्वा धातस्तदपि किमपि प्रार्थये त्वामिदानीं
माभूत्कस्याश्चिदपि पदवे प्रेयसि प्रेमबन्धः ॥ ३७ ॥

हस्तार्कयोगमवगत्य भवानिदानी
मुत्कण्ठितोऽस्ति किमु खञ्जनदर्शनाय ।
तत्पश्य पश्य कनकैकलताविवर्ति-
पद्मस्थितस्य युगल नवखञ्जनस्य ॥ ३८ ॥

यूना पतिष्यति विलोचनखञ्जनाना
दृष्ट्वा गत नयनखञ्जनमायताक्ष्या. ।
इत्याशयेन किमकारि मनोभवेन
ताटङ्कयुग्मकपटादिह पाशबन्ध ॥ ३९ ॥

अभिनवपरिरम्भारम्भसभाव्यमान
मधुकरपटलीभि पुण्डरीकभ्रमेण ।
मदनविजययात्रामात्रलब्धैर्यशोभि-
श्चुरितमतुलज्जाहार्यं भाति हास्य मृगाक्ष्या ॥ ४० ॥

क्वचिरतिमिरजालं दीर्घकालं दधानः
सितविकसितमद्धे चारुपङ्केरुहं च ।
प्रसरदमृतसिन्धूमुद्भमन्नाविरास्ते
नवकनकलतायां निष्कलङ्कः कलावान् ॥ ४१ ॥

अपरगिरिकदारो लब्धगङ्गाच्छधारो
जयति कनकवल्लीसङ्गभागुज्ज्वलश्रीः ।
तदुपरि रुचिरेयं चन्द्रलेखा विशेषा-
दधिगतपरिवेषा चारुवेषा चकास्ति ॥ ४२ ॥

भ्रमरसरिदुदञ्चद्वीचिरिन्दोरमन्दो
विहरति तिमिराणामेष तस्मिन्विवर्तः ।
तदुपरि रुचिरास्ते तारका तारकान्ति-
र्जयति मदनसृष्टिः काचिदेवंविधैव ॥ ४३ ॥

भित्त्वा हाटकसंपुटं तदुदरात्सिन्दूरमिन्दूद्भवे
वक्त्राम्भोरुहनागरीकरतलेनादाय बिन्दुं ददौ ।
वक्षोजप्रतिपत्तमाशु करजैरुद्भिद्य तल्लोहितं
हृत्वा हर्षवशेन किन्नु तिलकं चक्रेऽतिचक्रोत्रणा ॥ ४४ ॥

रुचिरचिकुरराजीः पश्य राजीवदृष्टे-
र्विहरति कनकाद्रौ दर्पिणी सर्पिणी च ।
विमलकमलकोषे वीतदोषे परं च
स्पृशति बत समन्तादञ्जनं खञ्जनश्रीः ॥ ४५ ॥

विकचकमलकोषे हीनदोषेऽस्ति बिम्बी-
फलरुचिपरिचुम्बी चन्द्रिकाया विलासः ।
कनकशिखरिसङ्गादच्छगङ्गाप्रवाहो
विलसति सुरसाहो वारिवाहोपकण्ठे ॥ ४६ ॥

भ्रमन्मदसौन्दर्यविसारिवारि-
विराजिता रोवलिनी विभाति ।
यदङ्कजं पङ्कजयुग्ममुच्चै-
रनङ्गतुङ्गश्रियमादधाति ॥ ४७ ॥

आस्ते मतल्लो नवहेमवल्लो
तस्यां सुवर्णाचलयो. प्रकाशः ।
